श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ पवमानसूक्तम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ पवमानसूक्तम् ॥

हिर॑ण्यवर्णा॒ः शुच॑यः पाव॒का यासु॑ जा॒तः क॒श्यपो॒ यास्विन्द्रः॑।
अ॒ग्निं या गर्भं॑ दधि॒रे विरू॑पा॒स्तान॒ आप॒श्शग्ग्॑ स्यो॒न भ॑वन्तु॥

यासा॒ग्ं॒ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑व॒पश्यं॒ जना॑नाम्।
म॒धु॒श्चुत॒श्शुच॑यो॒ याः पा॑व॒कास्ता न॒ आप॒श्शग्ग्॑ स्यो॒ना भ॑वन्तु॥

यासा᳚ दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे बहु॒धा भव॑न्ति।
याः पृ॑थि॒वीं पय॑सो॒न्दन्ति॑ शु॒क्रास्ता न॒ आप॒श्शग्ग्॑ स्यो॒ना भ॑वन्तु॥

शि॒वेन॑ मा॒ चक्षु॑षा पश्यतापश्शि॒वया॑ त॒नुवोप॑ स्पृशत॒ त्वच॑ मे।
सर्वाग्॑ अ॒ग्नीग्ं॑ र॑प्सु॒षदो॑ हु॒वे वो॒ मयि॒ वर्चो॒ बल॒मोजो॒ निध॑त्त॥

पव॑मान॒स्सुव॒र्जनः॑।
प॒वित्रे॑ण॒ विच॑र्षणिः।
यः पोता॒ स पु॑नातु॒ मा॥

पु॒नन्तु॑ मा देवज॒नाः।
पु॒नन्तु॒ मन॑वो धि॒या।
पु॒नन्तु॒ विश्व॑ आ॒यवः॑॥

जात॑वेदः प॒वित्र॑वत्।
प॒वित्रे॑ण पुनाहि मा।
शु॒क्रेण॑ देव॒दीद्य॑त्।
अग्ने॒ क्रत्वा॒ क्रतू॒ग्ं॒ रनु॑॥

यत्ते॑ प॒वित्र॑म॒र्चिषि॑।
अग्ने॒ वित॑तमन्त॒रा।
ब्रह्म॒ तेन॑ पुनीमहे॥

उ॒भाभ्या॑ँ देवसवितः।
प॒वित्रे॑ण स॒वेन॑ च।
इ॒दं ब्रह्म॑ पुनीमहे॥

वै॒श्व॒दे॒वी पु॑न॒ती दे॒व्यागा॑त्।
यस्यै॑ ब॒ह्वीस्त॒नुवो॑ वी॒तपृ॑ष्ठाः।
तया॒ मद॑न्तः सध॒माद्ये॑षु।
व॒यग्ग् स्या॑म॒ पत॑यो र॒यी॒णाम्॥

वै॒श्वा॒न॒रो र॒श्मिभि॑र्मा पुनातु।
वातः॑ प्रा॒णेने॑षि॒रो म॑यो॒ भूः।
द्यावा॑पृथि॒वी पय॑सा॒ पयो॑भिः।
ऋ॒तावरी॑ य॒ज्ञिये॑ मा पुनीताम्॥

बृ॒हद्भिः॑ सवित॒स्तृभिः॑।
वर्षि॑ष्ठैर्दे॒वमन्म॑भिः।
अग्ने॒ दक्षै॑ँः पुनाहि मा॥

येन॑ दे॒वा अपु॑नत।
येनापो॑ दि॒व्यङ्कशः॑।
तेन॑ दि॒व्येन॒ ब्रह्म॑णा।
इ॒दं ब्रह्म॑ पुनीमहे॥

यः पा॑वमा॒नीर॒ध्येति॑।
ऋषि॑भि॒स्संभृ॑त॒ग्ं रस॑ँम्।

सर्वꣳ स पूतमश्नाति।
स्वदितं मातरिश्वना॥

पावमानीर्यो अध्येति।
ऋषिभिस्संभृतꣳ रसम्।
तस्मै सरस्वती दुहे।
क्षीरꣳ सर्पिर्मधूदकम्॥

पावमानीस्स्वस्त्ययनीः।
सुदुघाहि पयस्वतीः।
ऋषिभिस्संभृतो रसः।
ब्राह्मणेष्वमृतꣳ हितम्॥

पावमानीर्दिशन्तु नः।
इमं लोकमथो अमुम्।
कामान्थ्समर्धयन्तु नः।
देवीर्देवैः समाभृताः॥

पावमानीस्स्वस्त्ययनीः।
सुदुघाहि घृतश्चुतः।
ऋषिभिः संभृतो रसः।
ब्राह्मणेष्वमृतꣳ हितम्॥

येन देवाः पवित्रेण।
आत्मानं पुनते सदा।
तेन सहस्रधारेण।
पावमान्यः पुनन्तु मा॥

प्राजापत्यं पवित्रम्।
शतोद्यामꣳ हिरण्मयम्।

तेन॑ ब्रह्म॒ विदो॑ व॒यम्।
पू॒तं ब्रह्म॑ पु॒नीमहे॥

इन्द्र॑स्सुनी॒ती स॒हमा॑ पुनातु।
सोम॑स्स्व॒स्त्या वरु॑णस्स॒मीच्या᳚।
य॒मो राजा᳚ प्रमृ॒णाभि॑ः पुनातु मा।
जा॒तवे॑दा मो॒र्जय॑न्त्या पुनातु।
भूर्भुव॒स्सुव॑ः॥

तच्छं॒ योरावृ॑णीमहे।
गा॒तुं य॒ज्ञाय॑।
गा॒तुं य॒ज्ञप॑तये।
दैवी᳚ स्व॒स्तिर॑स्तु नः।
स्व॒स्तिर्मानु॑षेभ्यः।
ऊ॒र्ध्वं जि॑गातु भेष॒जम्।
शन्नो॑ अस्तु द्विपदे᳚।
शञ्चतु॑ष्पदे।
ओं शान्ति॒श्शान्ति॒श्शान्ति॑ः॥